इयम् आकाशवाणी

दिनाङ्क :- 06.02.2026 प्रात: - 06:55

अथ वार्ताः

## प्रधानमन्त्री -परीक्षा पे चर्चा

प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रातः 'परीक्षा पे चर्चा' इत्येतस्य संवाद-कार्यक्रमस्य नवमे संस्करणे देशस्य छात्रैः सह संवादं करिष्यति। कार्यक्रमस्य प्रसारणं प्रातः दश-वादनात् विभिन्नेषु मञ्चेषु भविष्यति। षड्विंशत्यधिक द्विसहस्रतम वर्षस्य संस्करणमिदं छात्रान् परीक्षा-काले चिन्तामुक्तं स्थातुं साहाय्यं कर्तुं, शिक्षणे प्रबलं ध्यानं प्रवर्धयितुं च केन्द्रितम् भविष्यति। परीक्षा पे चर्चा कार्यक्रमे प्रायः पञ्चदशमलवोत्तर चत्वारि कोट्यधिकाः छात्राः, शिक्षकाः, अभिभावकाः च MyGov पोर्टल माध्यमेन पञ्जीकरणं कृतवन्तः। अस्मिन् संस्करणे दिल्ली-नगरं विहाय, तमिलनाडु राज्यस्य कोयम्बत्तूर नगरं, छत्तीसगढस्य रायपुर नगरं, गुजरातस्य देव-मोगरा नगरं, असम-राज्यस्य गुवाहाटी-नगरं च अन्तर्भवति। प्रधानमन्त्रिणः नरेन्द्र-मोदिनः यू-ट्यूब्-वाहिन्यां, दूरदर्शने, शिक्षा-मन्त्रालयस्य सामाजिक-पटलेषु च अस्य प्रसारणं भविष्यति। कार्यक्रमः प्रायः सर्वेषु OTT इति मञ्चेषु अपि प्रत्यक्ष-प्रसारितः भविष्यति।

## प्रधानमंत्री धन्यवाद प्रस्ताव

प्रधानमन्त्रिणा नरेन्द्रमोदिना दृढविश्वासः प्रकटितः यत् वैश्विकस्तरे स्पर्धां कर्तुं भारतं पूर्णतया सज्जम् अस्ति, आत्मविश्वासेन निर्णायक-नीति-परिष्कारैः च सह तृतीयं बृहत्तमं अर्थव्यवस्था भवितुं प्रावर्तते। सः अवदत् यत्, सर्वकारः रिफार्म-परफार्म-एण्ड-ट्रान्सफ़ार्म इति दृष्ट्या अग्रे गच्छन् अस्ति, तथा च देशः रिफार्म्-

एक्स्प्रेस् इत्यस्मिन् अपि सम्मिलितः। सः ह्यः राज्यसभायां राष्ट्रपतेः अभिभाषणस्य धन्यवादप्रस्तावस्य चर्चायाः उत्तरम् अददात्।

2100-मोदी आन् रिफार्म् एक्स्प्रेस्

प्रधानमन्त्रिणः भाषणानन्तरं राज्यसभायां राष्ट्रपतेः अभिभाषणस्य धन्यवादप्रस्तावः ध्वनिमतेन स्वीकृतः।

गृह-मन्त्री जम्मू

केन्द्रीय-गृह-मन्त्री अमितशाहः जम्मू-नगरे सीमा-सुरक्षायाः समीक्षां करिष्यति सुरक्षा-स्थिति-विषये उच्च-स्तरीय-उपवेशनम् अपि आयोजयिष्यति। श्री शाह् वर्यः गतरात्रौ जम्मू-काश्मीरस्य द्वि-दिवसीय-यात्रायाम् जम्मू-नगरं सम्प्राप्तवान्। जम्मू-विमानस्थानके उपराज्यपालेन मनोजसिन्हा वर्येण गृहमन्त्रिणः स्वागतं कृतम्। यात्रावधौ श्रीशाहः सुरक्षाविभागैः प्रशासनिक-अधिकारिभिः च सह मिलित्वा समग्रस्य विधि-व्यवस्थायाः स्थितेः मूल्याङ्कनं करिष्यति तथा च वर्तमानस्य विकास-उपक्रमाणां प्रगतेः मूल्याङ्कनं करिष्यति।

प्रधानमन्त्री-मलेशियायात्रा

प्रधानमन्त्री नरेन्द्रमोदी फरवरीमासस्य सप्त-अष्ट-दिनाङ्कयोः मलेशियायाः प्रधानमन्त्रिणः अनवर-अब्राहिम इत्यस्य निमन्त्रणे क्वालालम्पुरं गमिष्यति। विदेशमन्त्रालयस्य सचिवः पी. कुमारन् आगामि-यात्रायाः विषये वार्तालापं कुर्वन् अवदत् यत् प्रधानमन्त्रिणः मोदिनः मलेशिया-देशस्य एषा तृतीया यात्रा भविष्यति । प्रधानमन्त्री नरेन्द्रमोदी मलेशिया-देशस्य प्रधानमन्त्रिणा सह द्वैपाक्षिकीं चर्चां करिष्यति तथा च भारत-मलेशिया-समग्र-सामरिक-सहभागित्वस्य अन्तर्गतं

व्यापारः,रक्षा,सुरक्षा, सेमिकण्डक्टर्स्, डिजिटल-प्रौद्योगिकी, अक्षय-ऊर्जा चेत्यादिषु प्राधान्य-क्षेत्रेषु प्रगतेः समीक्षां करिष्यति ।

## क्रिकेट

अद्य अपराह्णे जिम्बाब्वे-देशस्य हरारे-नगरे अण्डर्-19 एकदिवसीय क्रिकेट्-विश्वचषक-क्रीडायाः निर्णायक-क्रीडायां भारतं इंग्लैंड-देशेन सह स्पर्धिष्यति। भारतीय-समयानुसारम् अपराह्णे एक वादने एषा स्पर्धा आरभ्यते।

।। इति वार्ताः।।